दाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमशोषयुक्तम् । मध्यंदिने कुप्यति चार्द्धराते निदाघकाले जलदात्यये च । शीते च शीतैः समुपैति शान्तिं सुस्वादुशीतैरति भोजनैश्च” । निष्पावो राजमाषः । सौवीरं सन्धानभेदः । सुराविकारैः “परिपक्वान्नसन्धानसमुत्पन्ना सुरा मता” । तस्या विकारैः । रविप्रतापः आतपः । ग्राम्यातियोगो मैथुनाधिक्यम् । विदाहीत्युक्तापि अशनैर्विदग्धैरिति बोधयति अविदाहिवस्तुनोऽपि पित्तवशाद्विदाहित्वं भवति । जलदात्यये शरदि । शीतैर्वातादिभिः । श्लैष्मिकमाह “आनूपवारिजकिलाटपयोविकारैर्मांसेक्षुपिष्टकृशरातिलशष्कुलीभिः । अन्यैर्बलासजनकैरपि हेतुभिश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम् । हृल्लासकाससदनारुचिसम्प्रसेकैरामाशये स्तिमितकोष्ठशिरोगुरुत्वैः । भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रम् सूर्य्योदयेऽथ शिशिरे कुसुमागमे च” । आनूपं बहुलजलदेशजं भक्ष्यम् । वारिजं शालूकादि “पक्वं दध्ना समं क्षीरं विज्ञेया दधिकूर्चिका । तक्रेण तक्रकूर्ची स्यात्तयोः पिण्डः किलाटकः” । पयोविकारः पायसादिः पिष्टं माषादिः । अन्यैः गुर्वादिभिः । स्तिमितमार्द्रपटावगुण्ठितमिव यत्कोष्ठं शिरश्च तयोर्गुरुत्वैः सह । सूर्य्योदय इति त्रिधा विभक्तदिवसप्रथमभागस्योपलक्षणम् । शिशिरे तत्र कफस्यातिसञ्चयात् । कुसुमागमे वसन्ते । द्वन्द्वजमाह “द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम् । सर्वेषु देशेषु च सर्वलिङ्गं विद्याद्भिषक् सर्वभवं हि शूलम् । सुकष्टमेनं विषवज्रकल्पं विवर्जनीयं प्रवदन्ति तज्ज्ञाः” । सर्वेषु देशेषु हृत्पृष्ठपार्श्वत्रिकवस्तिनाभ्यामाशयेषु । सर्वभवं त्रिदोषजम् । आमजमाह “आटोपहृल्लासवमी गुरुत्वस्तैमित्यमानाहकफप्रसेकैः । कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति” । अत्रामशूले जाते पश्चाद् दोषसम्बन्धः अतएवास्य शूलस्याष्टमत्वमुक्तम् । स च प्रथममामाशये भवति पश्चात् सम्बन्धिभिर्दोषैर्वस्तिनाभिहृत्पार्श्वकुक्षिषु भवति यथा दोषसम्बन्धः । आमशूलस्य दोषविशेषेण देशविशेषमाह “वातात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापि वदन्ति नाभ्याम् । हृत्पार्श्वकुक्षौ कफसन्निविष्टं सर्वेषु देशेषु च सन्निपातात्” । हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ । कफसन्निविष्टं कफेनाविष्टम् “वस्तौ हृत्कटिपार्श्वेषु स शूलः कफवातिकः४ कुक्षौ हृन्नाभिमध्ये तु स शूलः कफपैत्तिकः५ । दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः” । तन्त्रान्तरोक्तमामशूलमाह “अतिमात्रं यदा भुक्तं पावके मृदुतां गते । स्थिरीभूतन्तु तत्कोष्ठे वायुरावृत्य तिष्ठति । यदान्नं न गतं पाकं तच्छूलं कुरुते भृशम् । मूर्च्छाध्मानं विदाहञ्च हृत्क्लेशं [illegible] विलम्बिकम् । कम्पं वान्तिमतीसारं प्रमेहं जनयेदपि । अविपाकोद्भवं शूलमेतमाहुर्मनीषिणः” अविपाकोद्भवम् आमोद्भवमित्यर्थः । अथ शूलस्योपद्रवानाह “वेदनातितृषा मूर्च्छा आनाहो गौरवारुची । कासः श्वासो वमिहिक्का शूलस्योपद्रवाः स्मृताः” । अथासाध्यत्वादिकमाह “एकदोषानुगः साध्यः कृच्छ्रसाध्यो द्विदोषजः । सर्वदोषान्वितो घोरस्त्वसाध्यो भूर्य्युपद्रवः” । अथारिष्टमाह “वेदनातितृषा मूर्च्छा आनाहो गौरवं ज्वरः । भ्रमोऽरुचिः कृशत्वञ्च बलहानिस्तथैव च । उपद्रवा दशैवैते यस्य शूलेषु, नास्ति सः” । अथ शूलस्यैव भेदं परिणाममाह “स्वैर्निदानैः प्रकुपितो वातः सन्निहितो यदा । कफपित्ते समावृत्य शूलाकारो भवेद्बली । भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम्” । स्वैर्निदानैरित्यादिना निदानपूर्व्विका संप्राप्तिरुक्ता भुक्ते जीर्य्यतीत्यादिना लक्षणमुक्तम् । समावृत्य व्याप्य । तस्य लक्षणमप्येतत् समासेनाभिधीयते । “आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः । स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेत् भिषक् । तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तरम् । शूलं शीतशमप्रायं पैत्तिकं लक्षयेत् बुधः । छर्द्दिहृल्लाससम्मोहस्वल्परुक् दीर्घसन्तति । कटुतिक्तोपशान्तौ च विज्ञेयञ्च कफात्मकम् । संसृष्टलक्षणं बुद्धा द्विदोषं परिकल्पयेत् । त्रिदोषजमसाध्यं स्यात् क्षीणमांसबलानलम्” । अथान्नद्रवनामानं शूलविशेषमाह “जीर्णे जीर्य्यति चाप्यन्ने यच्छूलमुपजायते । पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा । न शमं याति नियमात् सोऽन्नद्रव उदाहृतः । नेदं शूलमसाध्यं चिकित्साभिधानात्” ।

अथ शूले पथ्यापथ्ये भावप्र° दर्शिते यथा

“कलाययवगोधूमाः शालाकाः कोरदूषकाः । राजमाषाश्च कुलत्थाः कङ्गुशालयः । दधिसुसरसं क्षीरं सर्पिर्गव्यं समाहिषम् । वास्तुकं कारवल्ली च कर्कोटकफलानि च । बर्हिणो हरिणास्तुस्था रोहिताद्याः कपिञ्जलाः । एतच्छूलामये शस्तामतानि चिकित्सकैः ।